# UNIVERSITY OF NORTH BENGAL

B.A. Honours 3rd Semester Examination, 2019

## CC5-SANSKRIT

## GĪTĀ AND UPANIṢAD

Time Allotted: 2 Hours | Full Marks: 60

*The figures in the margin indicate full marks.*
*Candidates should answer in their own words and adhere to the word limit as practicable.*

### क–विभागः

1. अधोलिखितयोः कस्यचित् एकस्य प्रश्नस्योत्तरं संस्कृतभाषया देवनागरीलिप्या च आलोचयत – 12×1 = 12

(क) को नाम कर्मयोगः ? श्रीमद्भगवतगीताम् आश्रित्य निष्कामकर्म–विषये प्रबन्धमेकं लिखत।

(ख) "तस्मात् सर्वगतं ब्रह्म नित्यं यज्ञे प्रतिष्ठितम्"– इति पङ्क्तिः सम्यग् व्याख्येया।

2. संस्कृतभाषया देवनागरीलिप्यां एकस्य व्याख्या कार्या – 6×1 = 6

(क) न हि कश्चित्क्षणमपि जातु तिष्ठत्यकर्मकृत्।
कार्यते ह्यवशः कर्म सर्वः प्रकृतिजैर्गुणैः॥

(ख) श्रेयान् स्वधर्मो विगुणः परधर्मात्स्वनुष्ठितात्।
स्वधर्मे निधनं श्रेयः परधर्मो भयावहः॥

3. वङ्गभाषया आङ्गलभाषया वा अनुवादः कार्यः (द्वयोः) – 3×2 = 6

(क) लोकेऽस्मिन् द्विविधा निष्ठा पुरा प्रोक्ता मयानघ।
ज्ञानयोगेन सांख्यानां कर्मयोगेन योगिनाम्॥

(ख) मयि सर्वाणि कर्माणि सन्नस्याध्यात्मचेतसा।
निराशीर्निर्ममो भूत्वा युध्यस्व विगतज्वरः॥

(ग) कर्मणैव हि संसिद्धिमास्थिता जनकादयः।
लोकसंग्रहमेवापि संपश्यन् कर्तुमर्हसि॥

4. संस्कृतभाषया देवनागरीलिप्या च द्वयोः संक्षिप्तोत्तरं प्रदेयम् – 3×2 = 6

(क) पापं के भक्षन्ति ?

(ख) गीतानुसारेण 'मिथ्याचारः' इति शब्दस्य कः अर्थः ?

(ग) 'ज्यायसी चेत्कर्मणस्ते मता बुद्धिर्जनार्दन..........' वक्ता कः ? अत्र ज्यायसी इति शब्दस्यार्थः कः ?

## ख–विभागः

5. एकस्य प्रश्नस्योत्तरं प्रदेयम् – 12×1 = 12

(क) बृहदारण्यकोपनिषदाधारेण जीवात्मन उत्क्रमणविषयम् आलोचयत।

(ख) जनकमैत्रेयीसम्वादं संक्षेपेण विवृणुत।

6. एकस्य व्याख्या कार्या संस्कृतेन देवनागरीलिप्या च। 6×1 = 6

(क) मनसैवानुद्रष्टव्यं नेह नानास्ति किञ्चन।
मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यति॥

(ख) अन्धं तमः प्रविशन्ति येऽविद्यामुपासते।
ततो भूय इव ते तमो य उ विद्यायां रताः॥

7. द्वयोः अनुवादः कार्यः – 3×2 = 6

(क) तस्मिन् शुक्लमुत नीलमाहुः पिङ्गलं हरितं लोहितं च।
एष पन्था ब्रह्मणा हानुवित्तस्तेनैति ब्रह्मवित् पुण्यकृत्तैजसश्च॥

(ख) अणुः पन्था वितत पुराणो
मां स्पृष्टोऽनुवित्तो मयैव।
तेन धीरा अपियन्ति ब्रह्मविदः
स्वर्गं लोकमित ऊर्ध्वं विमुक्ताः॥

(ग) अनन्दा नाम ते लोका अन्धेन तमसावृता।
तांस्ते प्रेत्याभिगच्छन्त्यविद्वांसोऽबुधो जनाः॥

8. संस्कृतभाषया देवनागरीलिप्या च द्वयोः संक्षिप्तमुत्तरं प्रदेयम् – 3×2 = 6

(क) बृहदारण्यकोपनिषदि कति काण्डाः सन्ति ? तेषां नामानि लिखत।

(ख) विद्याऽविद्यायाः फलं किमस्ति ?

(ग) आत्मज्ञानं विना का दुर्गतिः ?

——×——

# UNIVERSITY OF NORTH BENGAL

B.A. Honours 3rd Semester Examination, 2019

## CC6-SANSKRIT

## CLASSICAL SANSKRIT LITERATURE (DRAMA)

Time Allotted: 2 Hours | Full Marks: 60

*The figures in the margin indicate full marks.*
*Candidates should answer in their own words and adhere to the word limit as practicable.*

### विभागः-क

1. संस्कृतभाषया देवनागरीलिप्या च <u>एकस्य</u> उत्तरं प्रदेयम् – 12×1 = 12

(क) स्वप्नवासवदत्तम् इति नाटकमवलम्ब्य मन्त्रिणः यौगन्धरायणस्य कूटनैतिकपरिचयः प्रदेयः।

(ख) स्वप्नवासवदत्तमिति नाटके प्रथमाङ्के वर्णितस्य ब्रह्मचारिवृत्तान्तस्य नाटकीय – तात्पर्यमालोच्यताम्।

2. संस्कृतभाषया देवनागरीलिप्या च <u>एकस्य</u> व्याख्या कार्या – 6×1 = 6

(क) सुखमर्थो भवेद् दातुं सुखं प्राणाः सुखं तपः।
सुखमन्यद् भवेत् सर्वं दुःखं न्यासस्य रक्षणम्॥

(ख) कातरा योऽप्याशक्ता वा नोत्साहस्तेषु जायते।
प्रायेण हि नरेन्द्रश्रीः सोत्साहैरेव भुज्यते॥

3. वङ्गभाषया आङ्गलभाषया वा अनुवादः कार्यः (द्वयोः) – 3×2 = 6

(क) खगा वासोपेताः सलिलमवगाढो मुनिजनः
प्रदीप्तोऽग्निर्भाति प्रविचरति धूमो मुनिवनम्।
परिभ्रष्टो दूराद् रविरपि च संक्षिप्तकिरणो
रथं व्यावर्त्यासौ प्रविशति शनैरस्तशिखरम्॥

(ख) सविश्रमो ह्ययं भारः प्रसक्तस्तस्य तु श्रमः।
तस्मिन् सर्वमधीनं हि यत्राधीनो नराधिपः॥

(ग) कः कं शक्तो रक्षितुं मृत्युकाले
रज्जुच्छेदे के घटं धारयन्ति।
एवं लोकस्तुल्यधर्मो वनानां
काले काले छिद्यते रुह्यते च॥

4. संस्कृतभाषया देवनागरीलिप्या च प्रश्नद्वयं समाधेयम् – 3×2 = 6

(क) का आसीत् पद्मावती ? वासवदत्तया सह तस्याः सम्पर्कः कीदृशः आसीत् ?

(ख) रुमण्वान् कः ? 'स्वप्नवासवदत्तम्'– इति नाटके तस्य का भूमिका ?

(ग) कः आसीत् महासेनः ? कथं तस्य एवमभिधानम् ?

## विभागः-ख

5. अधोलिखितेषु कस्यापि एकस्य उत्तरं देयम् – 12×1 = 12

(क) अभिज्ञानशकुन्तलम् इति नाटके ऋषेः दुर्वाससः शापवृत्तान्तस्य तात्पर्यं सविमर्शमालोच्यताम्।

(ख) रूपके का नाम सन्धिः ? अभिज्ञानशकुन्तलम् इति नाटकमवलम्ब्य सन्धिभेदः पर्यालोच्यताम्।

6. संस्कृतभाषया देवनागरीलिप्या च एकस्य व्याख्या कार्या – 6×1 = 6

(क) मानुषीषु कथं वा स्यादस्य रूपस्य सम्भवः।
न प्रभातरलं ज्योतिरुदेति वसुधातलात्॥

(ख) अर्थो हि कन्या परकीय एव
तामद्य संप्रेष्य परिग्रहीतुः।
जातो ममायं विशदः प्रकामम्
प्रत्यर्पितन्यास इवान्तरात्मा॥

7. संस्कृतभाषया देवनागरीलिप्या च प्रश्नद्वयं समाधेयम् – 3×2 = 6

(क) शकुन्तलायाः पितरौ कौ ? केन सा पालिता ?

(ख) ''को नाम उष्णोदकेन नवमालिकां सिञ्चति''– कस्याः उक्तिरियम् ? कां च उक्तवती ? कस्मिन् प्रसङ्गे वक्तुः इयमुक्तिः ?

(ग) किं नाम भरतवाक्यम् ? 'अभिज्ञानशकुन्तलम्' इति नाटकस्य भरतवाक्ये कस्याः देवतायाः स्तुतिरस्ति ?

8. श्लोकपादपूरणं कुरुत (एकस्य देवनागरीलिप्या) – 6×1 = 6

(क) पातुं न प्रथमं व्यवस्यति जलं युष्मास्वपीतेषु या
————————————————।
————————————————
————————————————॥

(ख) ग्रीवाभङ्गाभिरामं मुहुरनुपतति स्यन्दने दत्तदृष्टिः
————————————————।
————————————————
————————————————॥

——×——

# UNIVERSITY OF NORTH BENGAL

B.A. Honours 3rd Semester Examination, 2019

## CC7-SANSKRIT

## POETICS AND LITERARY CRITICISM

Time Allotted: 2 Hours | Full Marks: 60

*The figures in the margin indicate full marks.*
*Candidates should answer in their own words and adhere to the word limit as practicable.*

### विभागः-क

1. संस्कृतभाषया देवनागरीलिप्या च अधोलिखितेषु छन्दःसु द्वयोः सोदाहरणं लक्षणम् आलोचयत – 6×2 = 12

(क) इन्द्रवंशा, (ख) उपेन्द्रवज्रा, (ग) शिखरिणी, (घ) शालिनी।

2. संस्कृतभाषया देवनागरीलिप्या च द्वयोः गण–निर्देशपूर्वकं सलक्षणं छन्दोनिर्णयं कुरुत – 3×2 = 6

(क) किमिव हि मधुराणां मण्डनं नाकृतीनाम्।

(ख) अध्याक्रान्ता वसतिरमुनाप्याश्रमे सर्वभोग्ये।

(ग) अहमवजितः पूर्वं तावत् सुतैः सह लालितः।

3. संस्कृतभाषया देवनागरीलिप्या च प्रश्नद्वयं समाधेयम् – 3×2 = 6

(क) गणलक्षणविषये गङ्गादासकृता कारिका लेखनीया।

(ख) कोऽसौ छन्दोमञ्जरीकारः ? तस्य कः संक्षिप्तः परिचयः ?

(ग) छन्दोमञ्जर्यानुसारेण यतिम् आलोचयत।

### विभागः-ख

4. कस्यचिदेकस्य प्रश्नस्य उत्तरं प्रदेयम् – 12×1 = 12

(क) किं नाम रूपकम् ? तस्य कति भेदाः ? तेषु नाटकस्य लक्षणं सोदाहरणम् आलोच्यताम्।

(ख) का नाम अर्थप्रकृतिः ? अस्याः कति भेदाः ? साहित्यदर्पणानुसारं तेषाम् आलोचनां कुरुत।

5. कस्यचिदेकस्य टिप्पणी कार्या – 6×1 = 6

मुखसन्धिः, विष्कम्भकः, भारतीवृत्तिः।

6. संस्कृतभाषया देवनागरीलिप्यां त्रयाणां सलक्षणं सोदाहरणं व्याख्या कुरुत – 4×3 = 12
यमकम्, रूपकम्, विभावना, निदर्शना, अर्थान्तरन्यासः।

7. संस्कृतभाषया देवनागरीलिप्यां च द्वयोः श्लोकार्थमालोच्य अलंकारनिर्णयः कर्तव्यः – 3×2 = 6

(क) राजीवमिव राजीवं जलं जलमिवाजनि।
चन्द्रश्चन्द्र इवातन्द्रः शरत्समुदयोद्यमे॥

(ख) वदनमिदं न सरोजं नयने नेन्दीवरे एते।
इह सविधे मुग्धदृशो भ्रमर! मुधा किं परिभ्रमसि ?॥

(ग) क्षीणः क्षीणोऽपि शशी भूयो भूयोऽभिवर्द्धते नित्यम्।
विरम प्रसीद सुन्दरि! यौवनमनिवर्ति यातं तु॥

——×——